लोकभाषाप्रचारसमितेः मासिकं मुखपत्रम्

# लोकभाषा-सुश्रीः

सिंहमासः(भाद्रपदः) अगस्तिः- सप्ताम्बरः







लोकभाषा-प्रचार-समितिः
सरस्वती बिहार, बरपदा, भद्रक, ओड़िशा - ७५६११३

# लोकभाषासुश्रीः

सिंहमासः (भाद्रपदः)
युगाब्दः - ५११३
अगस्त्यः - सप्ताम्बरः - २०११



मुख्यसंपादकः - **डा. सदानन्द दीक्षितः**
चरदूरवाणी - 09438298181
प्रबन्धसंपादकः - **श्री शुभेन्दु रथः**
चरदूरवाणी - 9237035884
सहयोगिसंपादकः - **नीरदचन्द्र आर्यः**
चरदूरवाणी - 9238308910

**प्रकाशनस्थानम्** -

❖ सरस्वतीविहारः, बरपदा, भद्रक - 756113
❖ 197, बापुजीनगर, भुवनेश्वर - 751009

Email : lokabhasha@samskrita.co.in
Website : http://samskrita.co.in



**सहयोगिनः** -

डा० विपिन विहारि शतपथी, कटकम्
डा० निरंजन साहुः, अजमेर
डा० नारायणदाशः, कोलकाता
डा० सन्तोष कुमार शुक्लः , दिल्ली
डा० सूर्यनारायणन नन्दः, दिल्ली
प. गोपालकृष्ण पाढी, ब्रह्मपूर
डा० गोकुलेन्द्रनारायण देवगोस्वामी, गुआहाटी
डा० हरिप्रसाद पाण्डेयः, बडोदरा
डा० सुशान्त कुमार राजः, मुम्बई



**मूल्यम्**

| | | |
|---|---|---|
| प्रतिखण्डम् | Rs. 10.00 | (दशरूप्यकाणि) |
| एकवर्षाय | Rs. 100.00 | (शतरूप्यकाणि) |
| आजीवनग्राहकत्वम् | Rs. 1000.00 | (सहस्ररूप्यकाणि) |


## सूचीपत्रम्


| क्र.सं. | विषयः | पृष्ठा |
|---|---|---|
| ०१ | ऋषिवृहस्पतिः | २ |
| ०२ | साफल्यरहस्यम् | ३ |
| ०३ | विचित्रविश्वम् | ४ |
| ०४ | गुरुकुलं जानन्तु | ५-७ |
| ०५ | असर्पकस्य घ्राणशक्तिः | ८ |
| ०६ | प्राकृतिक चिकित्सा | ९ |
| ०७ | सूक्तौ एव शक्तिः | १० |
| ०८. | संस्कृतं संस्कृतिश्च | ११-१२ |




श्री जगन्नाथ देवस्य श्रीमन्दिरम्
(श्री जगन्नाथ धाम, पुरी)

पुराणपरिचयः

# ऋषिः वृहस्पतिः

शिवपुराणानुसारं वृहस्पतेः पिता आङ्गीरसः माता सुरूपा च। तस्य अपर-भ्रातृद्वयस्य नाम उतथ्यः संवर्तनः च। वृहस्पतेः तिस्रः पत्न्यः आसन्। ताः नाम्ना तारा, सुरा ममता च। सुरायाः षड्कन्याः आसन्। ताः नाम्ना भानुमती, राका, अर्च्चिस्मती, महीश्रावती, सिनिवाली, हविस्मती च। ममतागर्भात् भरद्वाजः कचः च द्वौ पुत्रो जातौ। तथैव तारागर्भात् सप्तपुत्राः एका कन्या च जाता।



पूर्वकाले सर्वदा देवराक्षसयोः युद्धं प्रचलति स्म। वृहस्पतिः देवगुरुः, शुक्राचार्यः राक्षसाणां च गुरूः आस्ताम्। शुक्राचार्यः तपःबलेन महादेवशिवप्रासादात् 'मृत्युसंजीवनी' विद्याधिकारी संजातः। अनया विद्यया मृतजनः पुनर्जीवनं लभते स्म। शुक्राचार्यः स्वमन्त्रबलेन मृतराक्षसाणां जीवनदानम् अकरोत्। परन्तु वृहस्पतिः मृतसंजीवनीमन्त्रं न जानाति स्म। अतः ये देवाः कालकवलिताः अभवन् तेषां पुनः जीवनदानम् असम्भवं जातम्, एतत् देवानां कृते चिन्ताकारणम् अभवत्।

देवैः सह आलोच्य वृहस्पतिना स्थिरीकृतं यत् मृतसंजीवनी विद्याशिक्षार्थं गुरुपुत्रः कचः शुक्राचार्य समीपं प्रेषणीयः। देवाः सम्यक् विचार्य शुक्राचार्यसमीपं कचं प्रेषितवन्तः। ऋषिपुत्रः कचः शुकाचार्यसमीपं गत्वा स्वपरचियं प्रदाय शिष्यरूपेण तत्र स्थितवान्। मृत्युसंजीवनी मन्त्रशिक्षा ग्रहणविषये तेन न किमपि कथितम्। शुक्राचार्यः तमपि शिष्यरूपेण गृहीतवान्।

क्रमशः दानवाः 'कच' विषये ज्ञात्वा तं हन्तुं योजनां कृतवन्तः। एकदा गाः चारयितुं कचः वनमगच्छत्। तत्र राक्षसाः कचम् एकाकिनं मत्वा तं हत्वा तस्य मृतशरीरं व्याघ्रेभ्यःखादितुम् दत्तवन्तः।

सायम् आगते अपि कचः न प्रत्यागतः। शुक्राचार्यस्य कन्या देवयानी कचस्य जीवनं प्रत्यावर्त्तयितु पितरम् प्रार्थितवती। शुक्राचार्यः दिव्यदृष्ट्या सर्वम् अवगतम्। मृतसंजीवनी विद्यायाः प्रयोगेण कचः पुनर्जीवितः।

कियत् कालादनन्तरं पुनरपि राक्षसाः वनमध्ये एकाकिनं कचं दृष्ट्वा तं हतवन्तः। तस्य मृतशरीरं अग्निना दग्धीभूतं कारितम्। तत् भस्म जले पातयित्वा तत्जलं पानार्थं शुक्राचार्याय दत्तवन्तः। पुनरपि कचस्य प्रत्यावर्त्तने विलम्वस्य कारणात् देवयानी व्यग्रा सती पितरं ज्ञापितवती।

ध्यानेन शुक्राचार्यः ज्ञातवान् यत् कचः भस्मरूपेण तस्य उदरे अस्ति। कचस्य जीवनदानेन स्वस्य मृत्युः भविष्यतीति विचिन्त्य उदरे स्थिताय कचाय मृत्युसंजीवनीमन्त्रशिक्षां

सः दत्तवान्। येन कचः अपि मृतशुक्राचार्यं मृत्युसंजीवनीमन्त्र प्रयोगेण जीवनं दातुं समर्थः अभवत्, यथाकालं शिक्षां समाप्य कचः देवसमीपम् आगतवान्। देवाः आनन्दिताः संजाताः।

शुक्राचार्यः अदृश्यशक्ति-प्राप्तये पुनरपि शनिं तोषयितुं तपः आचरितवान्। अस्मिन्नेव समये वृहस्पतिः राक्षसाणां पुरतः शुक्राचार्यरूपेण आविर्भूतः। राक्षसाः छद्मरूपधारिणं वृहस्पतिं गुरुशुक्राचार्यः इति विचिन्त्य तं प्रति सम्मानं प्रकटितवन्तः।

वहुवर्षेभ्यः परं साधनां समाप्य यदा प्रकृत- शुक्राचार्यः प्रतिनिवृत्तः तदा राक्षसाः प्रकृतशुक्राचार्यम् अविदित्वा तस्य अपमानं कृतवन्तः। एतेन कुपितः शुक्राचार्यः अभिशप्तवान् - येन राक्षसाः निपातिताः। तदनन्तरं छद्मरूपी वृहस्पतिः मूलरूपेण आविर्भूय देवानां समीपं गतः। एवं बहुप्रकारैः वृहस्पतिना स्वबुध्या राक्षसकवलात् देवाः रक्षिताः।

ऋषेः वृहस्पतेः गुरुः आसीत् महर्षिः भृगुः। अस्य महर्षेः पुत्रः आसीत् शुक्राचार्यः। शुक्राचार्यः वृहस्पतिश्च महर्षेः भृगोः शिक्षालाभं कृतवन्तौ। परन्तु एतौ परस्परं अतीव विरोधिनौ आस्ताम्।

## 'साफल्यरहस्यम्'

**जीवनदर्शनम् :-**

संसारेऽस्मिन् एवंविधाः जनाः सन्ति, ये खलु जीवने किमपि महत्त्वपूर्णकार्यस्य कृते लक्ष्यं स्थापयित्वाऽपि नानाकारणतः साफल्यम् अप्राप्य विफलतां प्राप्नुवन्ति। एतस्य अनेकानि कारणानि स्युः। हतिहासपृष्ठामवलोकयामः चेत् प्रत्येक सफलतायाः पृष्ठतः एकासुदीर्घा विफलतायाः कथा अपि तिष्ठत्यैव। कथ्यते "Failure is the pillar of success." किन्तु प्रायतः जनानां विश्वासः अस्ति यत् ते सम्यक् चिन्तयन्ति तेषां योजना अवश्यमेव फलवती भविष्यति इति कतिपयाः प्रतिकूल परिस्थितेः कारणात् कार्यात् विरमन्ति। उक्तं च -

" प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहताः विरमन्ति मध्याः
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणाः न परित्यजन्ति "

कदाचित् अनेके पर्याप्त विद्या - बुद्धि सन्तोऽपि आशुसफलतायै ख्यातिलाभाय वा अदूरदर्शिकार्यं कुर्वन्ति येन ते स्वयमेव परास्ताः भवन्ति। अन्ते च आशारहिताः भवन्ति कतिपयाः सोद्देश्यमार्गात् विच्युताः अपि भवन्ति। सर्वप्राप्तये तीव्र+इच्छा फलवती न भवति चेत् ते निराशाः सन्तः लक्ष्यमर्गात् विरताः भवन्ति। एवं प्रकारेण अनेके प्रतिभाधारिणः जनाः अपि सफलतायाः स्वल्पदूरे स्थित्वाऽपि अज्ञातावशतः अन्ते

विफलतां प्राप्तुवन्ति। चिरकालं ख्यातिं प्राप्तये सधैर्यं कार्यं करणीयम् इति नैव विस्मर्त्तव्यम्। संसारे एवंभूताः अनेके जनाः सन्ति ये तावत् स्वकीयजीवद्दशायां यावत् ख्यातिं नैव अर्जयन्ति तावत् साफल्यं तेषां शिष्याः प्राप्नुवन्ति। यथा श्री-रामकृष्ण परमहंसः महान् साधकः आसीत्। एकः निष्ठावान् कालीसाधकरूपेण सः दिव्यज्ञानस्य अधिकारी आसीत् किन्तु स्वामिनः विवेकानन्दस्य स्रष्टृः (गुरू अर्थे) रूपेण सः यावत् ख्यातिम् अर्जितवान् तावत् सः व्यक्तिगतरूपेण नैव अर्जितवान् आसीत्।

सुतरां वयं एतादृशकीर्त्तियुक्तकार्यस्य मूलभित्तिं स्थापयिष्यामः येन अस्मत् परमपि अनेकवर्षं यावत् अस्माकं भविष्यवंशधराः सफलतायाः सौधनिर्माणं कर्त्तुं क्षमाः भविष्यन्ति। अनेन अनन्तकालं यावत् अस्माकं प्रभावः अक्षुण्णः स्थास्यति। यथा चाणक्यः, आर्यभट्टः, वराहमिहिरः, शङ्कराचार्यः, कविः जयदेवः, महर्षिः वाल्मीकिः, महर्षिः व्यासदेवः - प्रभृतीनाम् व्यक्तित्वम् तेषां कृते एव अस्माकं पुरतः चिरस्मरणीयाः। यदा कश्चन मानवः साक्षादेव साफल्यं वांच्छति तदा ज्ञायते यत् सः मानवः अपरिणामदर्शी इव परिणतिं प्रति अविचिन्त्य सामयिकम् आनन्दमिच्छति। एवं संकुचित-चिन्ताधारायां कश्चन कदापि व्यापकं- भविष्यं प्रति व्यापकलक्ष्यं स्थापयितुं समर्थो न भवति। अतः महापुरूषाणां, मुनि - ऋषीणां धैर्ययुक्त जीवन कथायाः समुचित शिक्षां लब्ध्वा वयं प्रगतिमार्गस्य पथिकाः भवामः। येन साफल्यम् अस्माकं पदस्पर्शं करिष्यत्यैव।

## विचित्रविश्वम्

**अस्माकं चतुःपार्श्वे संघटित घटनावल्यः सदैव मानवस्य जिज्ञासावृद्धौ सहायिकाः भवन्ति। सृष्टितत्त्वस्य रहस्यम् सर्वदा मानवमात्रम् अनुसन्धित्सुं च करोत्यैव। अस्यां परिस्थितौ वयं यदा सृष्टितत्त्वस्य, प्राचीन विद्यायाः ज्ञानसम्बन्धे वा अवलोकयामः तदा नूनमेव ज्योतिर्विज्ञानस्य खगोलशास्त्रस्य वा विषयः मनसि आयाति।**

आकाशे ग्रहनक्षत्राणां धारावाहिक नियमितगतिः अस्मिन् क्षेत्रे मानवसमाजं सर्वदा आकर्षयति। खगोलशास्त्रम् प्रमुखतः ग्रह-नक्षत्राणां गतौ-नीतौ-प्रवृतौ च आधारितम्। प्राग् वैदिककालाद् अस्मिन् सन्दर्भे नैकाः चर्चाः विचारालोचनाः गवेषणाः च प्रचलन्ति। तथाऽपि मनुष्यः सन्दर्भेऽस्मिन् निष्कर्षं सिद्धान्तं वा नैव प्राप्तवान् अद्यावधि। वैदिककालात् मुनयः ऋषयश्च ग्रह - नक्षत्राणाम् एवं प्रकारेण निर्दिष्ट

गतिं प्रवाहञ्च आधारीकृत्य निर्णीतवन्तः यत्, वस्तुतः सृष्टेः नियन्ता ''ब्रह्म'' एव। ''ब्रह्म'' एकाअदृश्या प्राकृतिकशक्तिः येन जगदिदं परिचालितं नियन्त्रितं च भवति। ब्रह्मतत्त्वम् आधारीकृत्य वस्तुविज्ञानिनः, ज्योतिर्विज्ञानिनः, दार्शनिकाः, साहित्यिकाश्च स्वकीयान् मतान् प्रकटितवन्तः व्याख्यां च कृतवन्तः। परन्तु स्तम्भेऽस्मिन् वयं केवलं वस्तुविज्ञान - ज्योतिर्विज्ञानयोरुपरि एव आलोचयिष्यामः।



आधुनिकगवेषणायाः इयं प्रतीयमाना भवति यत् वस्तुतः समग्रे ब्रह्माण्डेऽस्मिन् किमपि तत्त्वं स्थिरं नास्त्यैव। पृथिवी, अन्ये ग्रहाः च यथा घूर्णायमानावस्थायां गतिं कुर्वन्ति। नक्षत्राणि अपि तेषां स्वतन्त्रकक्षासु परिभ्रमन्ति। गवेषणायाः इदं ज्ञायते यत्, ऋषीणां नामाधारितं नक्षत्राणां नाम न अपितु नक्षत्राणां सृष्टितत्त्वं सावलीलभाषायाम् अवबोधयितुं मनुष्यसमा व्याख्या अभवत् इति। वैदिकसाहित्यम् वैदिकमन्त्रान् वा सम्यग्रूपेण अध्ययनम् अवबोधनं वा अशक्यम् । अतः अस्य गुह्यतथ्यम् वयम् अवगन्तुं नैव शक्नुमः । वेदस्य वैज्ञानिकगवेषणा एव अस्मिन् सन्दर्भे अस्मान् समधिकतथ्यं प्रदास्यति। राहु-केतु–इत्यादीनामम्भासुराणां नाम नैवाऽस्ति अपितु ज्योतिर्विज्ञान भाषायाम् सूर्यः पृथिव्याः कक्षपथ एवं च पृथिवी चन्द्रस्य कक्षपथ छेदनस्य द्वौ भिन्नस्थितौ येन सूर्योपरागः चन्द्रग्रहणं वा भवति। विषयेऽस्मिन् न केवलं भारतवर्षे अपितु विदेशेषु अपि अनुसन्धानं निरन्तरं प्रचलति।

आगामिमासात् ''नक्षत्रविज्ञानम्'' इति विशेष आलोचनामूलकः स्तम्भः प्रकाश्यते यस्मिन् खलु नैकानि गवेषणामूलकतत्त्वानि व्याख्यानपुरःसरं सावलीलरूपेण आलोचयिष्यन्ते ।

(क्रमश...)

# गुरुकुलं जानन्तु

बृहदीश्वरमन्दिरस्य कृते तामिलनाडुप्रदेशस्य ताञ्जोर नगरं ख्यातम्। अस्मात् नगरात् नैकेदूरे सालिआमङ्गलम् इति स्थानं वर्त्तते। सालिआमङ्गलात् स्वल्पे दूरे एव ''कालेञ्जरी'' ग्रामे वर्त्तते एका वैदिक - पाठशाला। गुरुवर्येण श्री सीताराम महोदयेन परिचाल्यते इयं पाठशाला। श्रीमता सीताराम - महोदयेन ५०९७ युगाब्दे, १९९६ संवत्सरे दिल्लीनगर्याम् अस्याः पाठशालायाः शुभारम्भः कृतः। २००८ संवत्सरे इयं पाठशाला गुरुवर्येण

स्वग्रामं कालेञ्जरीं प्रति स्थानान्तरिता। पितृपादानां श्रीमतां श्रीकृष्णमूर्त्ति महोदयानाम् आदेशेन श्रीरङ्गम् श्रीमद् अद्वैत पाठशालां प्रति



वेदशिक्षायाः कृते आगतवान्। तत्र श्रीमतः श्रीनिवास गणपदिगल् महोदयस्य अधीनेन श्री सीतारमणः कृष्ण - यजुर्वेदस्य अध्ययनमकरोत्। ततः सीतारमणः श्रृङ्गेरीमपि शिक्षायाः कृते अगच्छत्। ततः दिल्लीं गत्वा तत्र तस्य पोष्यपितुः श्रीगुरुस्वामिना सह मिलित्वा वेदपाठशालायाः शुभारम्भः कृतः।

देहल्यां स्थितपाठशालायां प्रायः सप्तदश संख्यकाः विद्यार्थिनः वेदशिक्षां लब्ध्वा देशस्य विभिन्नेषु प्रान्तेषु वैदिकशिक्षकरूपेण प्रतिष्ठिताः। तस्यैव शिष्यः श्रीरङ्गम् इति स्थाने वैदिकपाठशालामेकां प्रारब्धवान्। श्री सीतारमणः संप्रति तस्यां पाठशालायां प्रायः त्रिंशत् छात्रेभ्यः कृष्णयजुर्वेदस्य शिक्षां प्रयच्छति। एतेषां विद्यार्थिनां वयः सामान्यतः नवतः अष्टादश वर्षाभ्यन्तरे एव। श्री सीतारमणस्य पुत्रोऽपि अस्यां पाठशालायाम् अध्ययनं करोति।

पाठशालायां प्रत्यहं प्रातः पञ्चवादनतः सर्वे विद्यार्थिनः शय्यात्यागं कुर्वन्ति। नित्यकर्म समाप्य सन्ध्यावन्दनं कुर्वन्ति। ततः भिक्षायै ग्रामं ग्रामान्तरं गच्छन्ति। ततः प्रातराशं कृत्वा पठन्ति।

दध्यन्नं प्रमुखतः उपाहाररूपेण खादन्ति । ततः वेदपाठं अविरतं प्रचलति मध्याह्न द्वादशवादनं पर्यन्तम्। विद्यार्थिनः स्वयमेव रन्धनकार्यं कुर्वन्ति। मध्याह्नभोजनादनन्तरं विद्यार्थिनः किंचित् विश्रम्य द्विवादनतः पञ्चवादनं यावत् पुनः वेदपाठं कुर्वन्ति। ततः अपराह्णे समीपस्थ कावेरीनद्याः सिकताशय्यायां सानन्दं खेलन्ति । सायं पुनः सन्ध्यावन्दनं, संन्ध्यानीतिं च पालयन्तः रात्रौ अष्टवादने भुक्त्वा शयनं कुर्वन्ति। प्रतिपद्-अष्टमीतिथ्योः अवकाशः भवति अतः तस्मिन्दिने कदाचित् गुरूदेवः रामायणं महाभारतं पौराणिकं तादृशं किमपि आख्यानं वा दूरदर्शनमाध्यमेन प्रदर्शयति।

आश्रमे विद्यार्थिनां निवासाय सुव्यवस्था परिकल्पिता वर्त्तते। तत्र स्थितायां गोशालायां गोसेवाकर्मणि कदाचित् अन्तेवासिनः सहायतां कुर्वन्ति। शिष्याणां वेदध्वनिना अयम् आश्रम-परिसरः सर्वदा मुखरितः भवति।

संस्कृतेतरविषयान् पाठयितुं तत्र शिक्षकाः अपि नियुक्ताः कर्मरताः च सन्ति। काञ्चिकामकोटीपीठाधीश्वरः श्रीमद् शङ्कराचार्यः एतम् आश्रमं प्रति आगत्य परमसन्तोषं प्राप्तवान्। कदाचित् आश्रमं प्रति पण्डिताः आमन्त्रिताः मार्गदर्शकाश्च भवन्ति।

प्राचीनकालादेव भारते या गुरुकुल परम्परा विद्यते तस्याः एव परम्परायाः अनुसृजकः अयं गुरुकुलः। तेभ्यो गुरुवर्येभ्यो नमः ये खलु भारतीय सत्परम्परायाः संरक्षकाः।

इतिशम्।

# 'Indian sage made the first artificial diamond'

**New Delhi**

The Indian sage Bharadwaja described how to make artificial diamonds centuries before General Electric of USA produced the first synthetic diamond in the 50s, according to a book.

Artificial diamond making is part of ancient Sanskrit text 'Ratna Pradeepika' In which the saint scientist Bharadwaja deals with different classes of diamonds and composition of different artificial diamonds, says the book 'Science and Technology of Diamond', edited by GS Bhatnagar, a former scientist with the Department of Atomic Energy.

Bhatnagar had done extensive work on uranium and pegmatites of India.

The text,'Kritakavajra Nirnaya', also describe a complex engineering machinery assembly and elaborate manufacturing processes needed to make artificial diamonds.

However, based on the formula given in the text, to artificial diamond can be prepared unless one is able to exuate ancient Sanskrit terminology with modern English terms, Bhatnagar says.

According to him, vast amount of scientific knowledge about diamonds and other gems is locked in various ancient Sanskrit texts.

Based on observations made by authoris of these texts, areas of Magadh (south Bihar). Saurashtra (parts of Gujarat and Rajasthan) and Tripura (north east India) should be explored for finding new diamond fields.

The story of many world famous diamond of India is the history of diamond mining in India which dates to antiquity, say Bhatnagar and co-author SRN Murthy In a chapter.

Diamonds have adorned many an old temple and idol and were actively distributed through ancient trade routes, says Bhatnagar.

The earliest reference to diamonds is in Rigveda, the oldest Sanskrit text, in which the God Indra is reported to have killed a demon in a war with his weapon "Vajrayudh" or a diamond weapon.

Diamond have also been described in the 'Puranas', in Kautilya's Arthashastra' and Varahamira's 'Brahatsamhita which contain details of the origin, distribution, mineralogy and economics of diamonds.

(PTI)

जीवजगत्

# असर्पकस्य घ्राणशक्तिः

वयं सर्वे शयनकक्षे, रन्धनशालायां वा असर्पकस्य विमुक्तं विचरणं पश्यामः। परन्तु एतान् सम्मार्जन्या इतर पद्धत्या वा पीडयितुं / मारयितुं वा वयं यदा प्रयासं कुर्मः तदा एते असर्पकाः कुत्रचित् पलायन्ते। कदाचित् असर्पकान् कवलितान् कर्त्तुम् अस्माभिः बहुयोजनाः क्रियन्ते। सांप्रतिकयुगे हिट् (HIT) इत्यादिनां व्यवहारोऽपि क्रियते। अयम् असर्पकः जीवजगतः सर्वापेक्षया क्षिप्रचलितः जीवः। मण्डुकाः सरिसृपाः च असर्पकान् प्राप्तये वहुकष्टं स्वीकुर्वन्ति। तदर्थमेव विगतबहुवर्षेभ्यः अयम् असर्पकः अस्माकं समाजे यत्र कुत्राऽपि दृश्यते।



पृथिव्यां प्रायः ३५०० प्रजातेः असर्पकाः दृश्यन्ते। आश्चर्यमेतत् यत् अयम् असर्पकः अत्यन्तं कष्टसहिष्णुः कीटः यः खलु मरुभूमेः आरभ्य पर्वतं यावत्, जलप्लावित-स्थलादारभ्य हिमीकृताचलं यावत् सर्वत्र एव दृश्यन्ते। एतेषु प्रजातिषु केवलं त्रिंशत् (३०) प्रकारकाः असर्पकाः जनपदेषु प्रविशन्ति। अन्ये प्रजातयः गृहाद् बहिः तिष्ठन्ति।

गवेषणया ज्ञायते यत् असर्पकाः विपद् विषये सूचनां पूर्वमेव प्राप्नुवन्ति। असर्पकाः तेषां शरीरे स्थितैः केशैः तन्तुभिः वा विपद्विषये प्राक्सूचनां प्राप्नुवन्ति। असर्पकस्य केशाः एतावत् कोमलाः ये खलु सामान्यवायुप्रवाहेन वक्राः जायन्ते। अतः वायोः गत्यानुकूलं केशानां दिशपरिवर्त्तनेन चतुपार्श्वानाम् गतिम् अभिजानाति असर्पकः। अनेन असर्पकः तं प्रति आगतविपद् विषये ज्ञान्तुं पारयति, आत्मानं च सुरक्षितं कर्त्तुं इतरदिशि गतिशीलः भवति। आवश्यककाले उड्ड्यितुमपि पश्चाद्पदः नैव भवति। सामान्यतः शत्रोरागमनकाले वायोः गति विषये स्थितं पार्थक्यम् असर्पकः ज्ञातुं पारयति येन साधारण वायुप्रवाहकाले सः कथंचिदपि प्रभावितो नैव भवति। दृष्टान्तस्वरूपं तम् ताडयितुं वयंयदा उद्यताः भवामः तदा समीपवर्त्ती वायुः चलमानः भवति येन सामान्यचलमानं समीरम् असर्पकः अनुभवं कर्त्तुं क्षमो भवति। प्रायतः असर्पकाः प्रकाशं विहाय तमोभूते स्थाने स्थातुमिच्छन्ति तदर्थं प्रयासरताश्च भवन्ति। किन्तु कतिपयाः प्रजातयः प्रकाशं प्रति एव आकर्षिताः भवन्ति।

असर्पकाः विना भोजनम् एकमासं यावत् जीवितुं शक्नुवन्ति। जलं विनाऽपि सप्ताहं यावत् स्थातुं शक्नुवन्ति। आश्चर्यमेतत् यत् असर्पकस्य मृत्युरपि नैव सुसाध्यः। अस्य निर्दिष्टं भोजनं तथा किमपि नास्ति। यत् किमपि खादित्वा असर्पकः जीवितुं शक्नोति। किन्तु असौ स्वस्य वंशवृद्धिः क्षिप्रगत्या करोत्येव। आकलनात् ज्ञायते असर्पकानां संख्या इतरजीवेभ्यः समधिकमिति।

प्राकृतिक-चिकित्सा

# उपवासः

प्राकृतिक चिकित्सायाः पञ्चतत्त्वानि भवन्ति - क्षिति, अप्, तेजः, वायुः, आकाशश्च। एतेषु पञ्चतत्त्वेषु आकाशतत्त्वम् भवति एकं प्रमुखमुपादानम्। तत्त्वैतम् आधारीवृत्त्य कृतंनिदानम् उपवास चिकिच्सा हति कथ्यते समधिक विजातीय भोजनं शरीराय अहितकरं भोजनेभ्यः मानसिक दुश्चिन्तायाः कृते शरीर विकारः समुपजायते विष रसश्च क्षरितो भवति। एनं विषयुक्तरसं निष्कासयितुं उपवासः एव अमोघम् अस्त्रम्। उपवासमाध्यमेन प्रमुखतः ये रोगाः दूरीभूताः भवन्ति ते यथा - मेदवृद्धिरोगः, उदरव्यथा, कोष्ठकाठिन्यम्, स्त्रीणां प्रदररोगः, मधुमेहः, पित्तदोषः, लोहितचापः, अतिसारः, मूत्रग्रन्थिरोगः, अजीर्णम्, शिलारोगः, चर्मरोगः, ज्वरम्, शैत्यम्, निमोनिआ इत्यादयः।



न केवलमेतत् अपितु उपवासद्वारा काम-क्रोध लोभादिषु अपि नियन्त्रणम् भवति।

**उपवासविधिः**

उपवासविधिं चतुर्षु विभागेषु विभज्यते यथा उपवास-पूर्वः, उपवास-समयः, उपवास-समाप्तिः, उपवास-परवर्त्ती।

उपवासः यदा क्रियते दिनद्वयात् पूर्वं त्रिफलाजलसेवनं करणीयम्। ततः केवलं फलभक्षणम् अथवा फलरसपानम्, सद्यशाकादीनि च भोक्तव्यम्। उपवासकाले निम्बुक जलसेवनं भवितुम् अर्हति, किन्तु गरिष्ठ भोजनं सर्वादौ त्याज्यम्। उपवासकाले विशुध्द जलपानं कर्त्तव्यम्। एतदतिरिक्तं शुध्दवायुसेवनं, सूर्यस्य प्रकाशग्रहणं नित्यस्नानं च अपेक्षते।

उपवासकाले ध्यानं, मौनव्रतं वा आचरणीयम् । ध्यान-मौनव्रतस्य वा आचरणेन जीवनीशक्तेः वृद्धिर्भवति। स्वल्पेन श्रमेण अध्यात्म चिन्तनं कर्तुं शक्यते। अनेन मनः अपि प्रसन्नं तिष्ठति। एतदपि सर्वदा स्मरणीयम् यत् उपवासकाले मनसः सर्वाः अनावश्यकचिन्ताः परिहरणीयाः। कालेऽस्मिन् चिन्ता - उत्तेजना वा तिष्ठति चेत् उपकारस्थाने अपकारः भवितुमर्हति।

त्रीणि दिनानि उपवासं कृत्वा केवलं फलरसं पातव्यम्। दिनद्वयम् केवलं फलरसं पीत्वा तत्परदिनद्वयं फलानि शाकादीनि च भक्षणीयानि। ततः स्वाभाविकरूपेण केवलं सात्त्विकभोजनं करणीयम् । यथोक्तं महर्षिणा वाग्भट्टेन :-

''हितभुक्, मितभुक्, ऋतभुक्।''

इत्युक्ते शरीराय हितकरं-सुषमं परिमितं च भोजनं नियमित रूपेण करणीयम्।

उपवासस्य प्रारम्भात् अन्तं यावत् निम्बूकजलपानं भोजनमिव साहाय्यं करोति। निम्बूकमेवभूतं पोषकतत्त्वपूर्णफलं येन सर्वे शारीरिकविकाराः वात-पित-कफादि दोषाः च सुनियन्त्रिताः तिष्ठन्ति। निम्बुकं स्वयम् एकं पोषकतत्त्वम्। शास्त्रानुसारं निम्बुकेन सह लवणं शर्करा वा किञ्चित् मिश्रणं करणीयम्।

(क्रमशः...)

पृथिव्यां त्रीणि रत्नानि अन्नम् आपः सुभाषितम् ।
मूढैः पाषाणखण्डेषुरत्नसंज्ञा विधीयते ।।

# सूक्तौ एव शक्तिः

⇨ ''वहुत्र जीवितोमनः ।''

अर्थः :- मानवस्य मनः सर्वदाएव नैकविषयान् प्रति नैक स्थानानि च प्रयाति। इत्युक्ते मनमध्ये युगपत् नैकाः चिन्ताः उद्भवन्ति। ध्यानबलेन एव मनसः नियन्त्रणं साध्यम् ।

कथ्यते-''मनः एव मनुष्याणां कारणं बन्धमोक्षयोः ।'' (मनुस्मृतिः)

⇨ ''भाग्यहीनाः न पश्यन्ति बहुरत्ना वसुन्धरा ।''

अर्थः :- पृथिव्यां वसुन्धरायां वा अनेकरत्नानि सन्ति। किन्तु हतभाग्याः तत्र ज्ञातुं समर्थाः भवन्ति।

⇨ ''भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव।''

अर्थः :- धनिकजनः धनस्य सुरक्षायै सर्वदा शङ्कितः भीतश्च भवति। तथैव जीवः तस्य प्राणशक्तेः सुरक्षायै सर्वदा भीतः भवति।

⇨ ''ईर्ष्या हि विवेकपरिपन्थिनी''

अर्थः :- ईर्ष्याद्वारा व्यक्तेः व्यक्तित्वं नश्यति। वहुत्र दृश्यते यत् बुद्धिमान् जनः अपि ईर्ष्याकारणात् स्वस्य प्रतिद्वन्दिना सह जल्पम् अकृत्वा तस्य विरूध्दाचरणं करोति येन उभयोः समाजस्य च नाशः भवत्यैव। ईर्ष्या विवेकशक्तेः विनाशकरूपेण कार्यं करोति।

⇨ ''अङ्गीकृतं सुकृतिनः परिपालयन्ति ।''

सज्जनः यस्य कार्यस्य दायित्वं स्वीकरोति तत् सम्यक् रूपेण साधयति एव।''

⇨ ''अकाले कृतमकृतं स्यात् ।''

समीचीने काले कार्यं न भवति चेत् मूल्यहीनं भवति।

⇨ ''कालस्य कुटिला गतिः ।''

समयस्य गतिः कुटिला। कालक्रमेण जगतः परिवर्त्तमाना।

⇨ ''असत्यं मनोरञ्जनम् ।''

असत्यकथा सर्वदा एव जनान् आनन्दयति।

⇨ ''हितं मनोहारि च दुर्लभं वचः ।''

हितकथा दुर्लभा किन्तु कदाचित् अग्राह्या भवति।

⇨ ''सत्यं ब्रूयात् प्रियं ब्रूयात् मा ब्रूयात् सत्यमप्रियम् ।''

सत्यं वक्तव्यम्, मधुरमपि वक्तव्यं किन्तु अप्रियं सत्यं नैव वक्तव्यम्।

# संस्कृतं संस्कृतिश्च

संस्कृतं संस्कृतेर्मूलं ज्ञान-विज्ञानवारिधिः ।
वेदतत्वार्थ संजुष्टं लोकाऽऽलोककरं शिवम् ।।
(कपिलः)

**संस्कृतेः स्वरूपम्**

का नाम संस्कृतिः? परिष्करणं, संस्करणं, दूरित व्यपोहनम्, दुर्भावदहनं च संस्कृतिः इति। संस्कृतिर्हि जीवनोन्नतिसाधिनी, सद्गुणग्राहिणी, सत्पथविहारिणी, ज्ञानज्योतिः प्रचारिणी च। यथा कृषिकर्मणि तृणादिहेयपरिहारेण अभीष्टाङ्कुरादिरक्षणं तथैव संस्कृत्या दुर्भावनिरोधपूर्वकं दुर्गुणदमन-पुरस्सरं च सद्गुणरत्न संग्रहोऽनुष्ठीयते।

**संस्कृते-रर्थः**

''सम् पूर्वकात् 'क' धातोः 'क्तिन्' प्रत्यये कृते 'संस्कृति' शब्दः सिध्यति। संस्कृति शब्देन ''मनसः आत्मनो वा संस्करणं परिष्करणं च'' इत्यपि अर्थो गृह्यते। वस्तुतः भारतीया संस्कृतिरेव परिपूर्णतया संस्कृति शब्दस्य सार्थकतां द्योतयति।

**संस्कृतेः संस्कृताक्षयाः**

''भारतस्य प्रतिष्ठेद्वे संस्कृतं संस्कृतिस्तथा'' अनेन कथनेन उत्यऽपि सिध्यति यत्-संस्कृतम्-संस्कृतिः च अखण्डभारतवर्षस्य प्रतिष्ठायै अलमास्ताम्।

वेदेषु, धर्मसूत्रेषु, उपनिषत्सु, दर्शनेषु, स्मृति-ग्रन्थेषु च महता विस्तरेण धर्मार्थकाममोक्षादि पुरूषार्थ-चतुष्टयस्य, कर्त्तव्याकर्त्तव्यस्य च विवृतिरूपोपस्थाप्यते। वेदेषु अहिंसा-सत्यास्तेयब्रह्मचर्या परिग्रहादीनाम् अवश्यं कर्त्तव्यत्वेन निर्देशः उपलभ्यते। वेदमूलकमेव उपनिषदादीनामनुशासनम्। उपनिषत्सु आत्मज्ञान ब्रह्मप्राप्तिर्वा परमकर्त्तव्यत्वेन निर्दिश्यते। ''आत्मा वारे द्रष्टव्यः मन्तव्यः निदिध्यासितव्यः, आत्मनि खुल्वरे दृष्टे धृते मते विज्ञाते इदं सर्वं विदितम्। यजुर्वेदे ईशावास्योपनिषादि उच्यते - ''ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्''... इति। ब्रह्म साक्षात्कारः यदि जीवनेऽस्मिन् न क्रियते तर्हिः जीवनम् निष्फलमेव। ब्रह्मज्ञानेनैव जीवनस्योपयोगित्वम्।

इह चेदवेदोत्थ सत्यमस्ति,
न चेदिहावेदोन्महती विनष्टिः।
भूतेषु भूतेषु विचिन्त्य धीराः,
प्रेत्यास्माल्लोकादत्मृता भवन्ति।।

जीवने कर्त्तव्यनिष्ठता, अनासक्ति भावनया कर्मणि प्रवृतिश्च जीवनस्य साफल्यं दिशति। अतः उच्यते यजुर्वेदे-

''कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः''।

उक्तं च श्रीमद्भगवद्गीतायाम् :-

''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्म फलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।
(गीता 2-47)

एषैव संस्कृतिः लोकेषु विश्वबन्धुत्व भावनां जागरयति। समत्वदृष्टि सम्पादनेन च स्व परहित विभेद निवारणद्वारा सार्वभौतिकीं सार्वलौकिकीं चोन्नतिं निर्देशति-

''मित्रस्वाहं चक्षुषा सर्वाणि भूतानि समीक्षे
मित्रस्य चक्षुषा समीक्षामहे।''

''तत्र को मोहः कः शोकः एकत्वमनुपश्यतः।''

भौतिकवादे प्रवृत्तिश्चद् मानवस्य तर्हिः अध्यात्मसाधनं तत्वनानाधिगमश्च न कथमपि सम्भाव्यते। भौतिक विषयेषु अनवलि पृस्यैव तत्वज्ञानं सत्यदर्शनश्चः :-

''हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ।।

समाजस्य, देशस्य, राष्ट्रस्य च सर्वविधसमुन्नत्यै विचार-साम्यं, मतैक्यं, सामञ्जस्य चाभीष्टम्। विचारसाम्ये एव समवेतत्वम्, समन्विता कार्यवृत्तिख सम्भवति।

''समानी व आकृतिः समाना हृदयानि वः।
समानस्तु वो मनो यथा वः सुसहासति ।।

(ऋग्...)

लोके जागुरूकस्यैव प्रत्युत्पन्नमतेः प्रबुध्दबुध्देरेव कीर्तिलाभो विभवलाभश्च क्षमेण्येव सौभाग्यवाप्तिः। सदाचारेणैव जीवनस्य सर्वविधोत्कर्षः। ''अध्यवसाय शीलस्य न दैन्यः, न पराभवो, न चावधीरणम्-

भूत्यै जागरणम् अभूत्यै स्वपनम्। (यजुः)

कृधी न ऊर्ध्वान् चरथाय जीवसे। (ऋक्)

उच्छ्रयस्व महते सौभगाय। (अपर्वः)

जीवने सदाचारस्य सद्वृत्तत्वस्य महत्यावश्यकता। सदाचारेण परिपूतं जीवनमैहिकंमामुष्मिकं च फलमवाप्तुं शक्नोति। आचारहीनस्य सर्वशास्त्रमवगसोऽपि निष्पल-मेव। अतः उच्चते :-

''आचारः परमोधर्मः आचारोपरमं तपः।
आचारो परमंपूण्यमाचाराद् किं न साध्यते ।।

अपिच :-

आचारः परमोधर्मः क्षुत्युक्तः समार्त्त एव च।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादत्मवान् दिज्''।

लोके विषयाक्तिः मानवविनाशकारिणी। धृतप्रदीप्तो बह्निरिव विषयोपभोगो दोषायैव प्रवर्तते। अतः विषयासक्तिः

हेयोपेक्ष्या च :-

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णावर्त्मेव भूय एवाभिवर्धते ।।

मातृपितृगुरूणा शुश्रूषा सततं कल्याण कारिणी। सा चतुर्विधां श्रियमाबहति। अतएव मनुना संस्तूयते :-

''अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशोबलम्।।

(मनुस्मृतिः)

(अवशिष्टं आगामिनि मासे)

# सूचना

**प्रियतराः पाठकाः,**

नमोनमः। लोकभाषा-प्रचार-समिति-पक्षतः इयं पत्रिका लोकभाषा सुश्रीः विगत २५ वर्षेभ्यः सरल संस्कृत भाषया एव प्रकाशिता भवति।

प्रचलित सिंहमास-युगाव्द ५११३ तः अस्याः पत्रिकायाः पूर्णतः नवकलेवरं भवति। भवतां कृते अयमनुरोधः कृपया भवन्तः विज्ञानम्, स्वास्त्थम्, आयुर्वेद, वेद-पुराणादिविषयकम् अथवा मौलिक रचनाः अधोलिखित संकेतेन प्रेषयन्तु। अनेन सह भवद्भिः आयोजित-संस्कृतकार्यक्रमाणाम् अग्रीम सूचनाम् अपि वयं भवताम् अनुरोधेन प्रकाशयिष्यामः।

लेखाभिः सह लेखकस्य / लेखिकायाः वा पूर्ण संकेतम्, चरदूरवाणीसंख्या, छायाचित्रमेकं च अवश्यं प्रेषयन्तु।

**संकेतः - डा. सदानन्द दीक्षितः**
सरस्वती विहारः
वरपदा, भद्रक-756113
ओडिशा
चरदूरवाणी संख्या-9438298181
Email : www.samskrita.co.in

## पत्रिकायाः प्राप्तये

नाम-
संकेतः-
दूरभाषाङ्कः-
ई. मेल्-

☐ एकवर्षाय ☐ वर्चद्वयस्यकृते ☐ पञ्चवर्षाणांकृते

**मूल्यम्**

| | |
|---|---|
| प्रतिखण्डम् | Rs. 10.00 |
| एकवर्षाय | Rs. 100.00 |
| आजीवनग्राहकत्त्वम् | Rs. 10,000.00 |

लोकभाषा प्रचार समितिः नाम्ना Cheque अथवा M.O. प्रेषणीयम्।

# दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं-5, झण्डेवालान, करोल बाग, नई दिल्ली-5

**आवश्यक सूचना**

## अखिल भारतीय नवोदित संस्कृत कवि प्रतियोगिता 2011-2012

दिल्ली संस्कृत अकादमी द्वारा भारत वर्ष के नवोदित संस्कृत कवियों को प्रोत्साहित करने के उद्देश्य से वर्ष 2011-2012 में गत वर्षों की भांति इस वर्ष भी अखिल भारतीय नवोदित संस्कृत कवि प्रतियोगिता का आयोजन किया जा रहा है। एतत्सम्बन्धी निर्धारित आवेदन पत्र तथा नियम अकादमी कार्यालय से दिनांक 18.8.2011 से 17.10.2011 तक प्राप्त किये जा सकते हैं और आवेदन पत्र डाक द्वारा भी उक्त तिथि तक निःशुल्क प्राप्त किये जा सकते हैं। अकादमी कार्यालय में आवेदन-पत्र जमा करने की अन्तिम तिथि 17.10.2011 है।

ह०/-

(डा. सुरेश चन्द्र शर्मा)

सचिव

# संस्कृत-सम्भाषण-शिबिरसमाचारः

लोकभाषा प्रचार समितेः कटक शाखा पक्षतःस्थानीये भगतपुरस्थिते श्री मा ष्टड़ि केयार् इति शिक्षानुष्ठाने प्रथमतः स्नेहमिलनद्वारा संस्कृतं प्रति रुच्युत्पादनाम् अनन्तरं संस्कृत-सम्भाषण-शिविरम् च दिनांङ्क-०८-०८-२०११ तः २०-०८-२०११ पर्यन्तम् प्राचलत् । डा० हरेकृष्ण महताव आदर्श संस्कृत महाविद्यालयस्य अध्यापकानां श्री अशोककुमारपण्डा महाभागानाम् आध्यक्ष्ये अनुष्ठित-उद्घाटनी-सभायां अध्यापकः श्री क्षीरोद कुमार साहुः उद्घाटकत्वेन योगदानमकरोत् । ३० छात्राः शिविरेऽस्मिन् सोत्साहम् अंशग्रहणं कृत्वा संस्कृत सम्भाषणस्य अभ्यासं कृतवन्तः । समितेः केन्द्रीय प्रशिक्षकः श्री नीरदचन्द्र आर्यः शिबिरं परिचालितवान् ।

# संस्कृतस्य शक्तिः विपुला



सहस्त्रसहस्त्रवर्षैभ्यः विविधविद्या-विचारधाराभिः प्रवहमाना संस्कृतभाषा मन्दाकिनीव पुण्यतोया पूर्णगर्भा विद्याविद्योतिनी परिणता। संस्कृतभाषायाः अन्तः मुनि-ऋषि - तपस्वि - साधु - सज्जनानां मननं कदाचित् मन्त्ररूपेण वेदेषु, सुत्ररूपेण शास्त्रेषु, श्लोकरूपेण काव्येषु वा स्तोत्ररूपेण पुराणग्रेन्थेषु प्रभादीप्तं विराजते। अतः संस्कृतभाषा अद्यापि न केवलं भारतीयानाम् अपितु समग्रविश्वे ज्ञान-विज्ञानदीप्तानां विदुषां प्रियभाषारूपेणादरणीया। भारतीयाः न केवलं संस्कृतम् आद्रियन्ते, अपितु विश्वस्त-भाषारूपेण श्रद्दधते। आदिमकालात् भारते प्रवाहिता संस्कृतमन्दाकिनी अद्यापि विविधतायम् एकतायाः स्वरूपं धारयति। भारते विद्यमानानां सर्वासां प्रान्तीयभाषाणां जननी धात्री वा भवति संस्कृतम्। तथैव सर्वेषां प्रान्तीयसाहित्यानां मूलं हि संस्कृतसाहित्यम्, प्रान्तीय संस्कृतेः मूला हि संस्कृताश्रिता संस्कृतिः, हिन्दु धर्माचरणानां सर्वेषां भारतीयानां श्रद्धामूलं हि संस्कृतम्। एवं विविधरूपेण संस्कृतं भारतीयभाषाणां, विचाराणां, संस्कृतीनां संहतिसुत्रं विराजते। तथैवाद्य भारताद् विच्छिन्नेषु नैकराष्ट्रेषु प्रतिवेशिराष्ट्रेषु च संस्कृतमूला संस्कृतिः परिलक्ष्यते। चीन-जापान-काम्बोडिआ-थाईलाण्ड-इण्डोनेशिया-नेपाल-श्रीलङ्का-पाकिस्थान-आफगानीस्थान-श्याम-सिंगापुरादि राष्ट्राणां प्राचीना संस्कृतिः भारतमूला हिन्दु-बौद्ध-धर्माश्रिता संस्कृतमयी। किन्तु तैः तैः राष्ट्रैः सहास्माकं राष्ट्रस्य प्रीतिपूर्णः संपर्को नास्ति। यद्यपि तत्तद्देशीयाः नागरिकाः भारतं बहुमन्यन्ते। बहुषु राष्ट्रेषु अद्यापि सा संस्कृतमयी प्राचीना संस्कृतिः जीविताऽस्ति। तथैव द्वित्रशताब्दीभ्यः पूर्वं भारतात् श्रमिकरूपेण गन्तवन्तः भारतीयाः मरिशस-फिजि-गुएनादि-राष्ट्रेषु बहुलतया निवसन्ति, भारतीयां संस्कृतिं च परिपालयन्ति। अतस्तत्तद्देशेषु संस्कृतस्यापि सुमहान् प्रभावो वर्तते। तथैव भैतिकविज्ञानक्षेत्रे कम्प्युटर प्रयोगक्षेत्रे च संस्कृते विद्यमानं वैज्ञानिकं सूत्रम् उपादेयं भवति। मानवीयमूल्यबोधस्य प्रतिष्ठार्थं विश्वमानवसभ्यतायाः संरक्षणार्थं विकाशार्थं च संस्कृते विद्यमानं दार्शनिकं ज्ञानं परमावश्यकं भवति।

अद्य संस्कृतदिवसावसरे तदेवास्माकं संकल्पो भवतु यद्वयं संस्कृतस्य विपुलशक्तेः सन्धानं विधाया मानवसभ्यताकल्याणार्थं राष्ट्रशक्तिविकाशार्थं च सदुपयोगं करिष्यामः।

**मुख्यसम्पादकः - डॉ. सदानन्ददीक्षितः**


प्रेषिका-
लोकभाषाप्रचारसमितिः,
सरस्वती विहारः, बरपदा
भद्रक-७५६११३
वेब : www.samskrita.co.in
इ-मेल : sushreeh@samskrita.co.in

सेवायाम् :

RNI Regd. No. 1811/97-ORI-SAN 0005
Printed Book